# .. rAsagItA ..

# ॥ રાસગીતા ॥

## Document Information

Text title : rAsagItA

File name : rAsagItA.itx

Category : gItA

Location : doc_giitaa

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : May 18, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ રાસગીતા ॥

નારદ ઉવાચ –
શ્રીરાધા માધવસ્યાપિ રાધાયાશ્ચાપિ માધવઃ ।
કરોતિ પરમાનન્દં પ્રેમાલિઙ્ગનપૂર્વકમ્ ॥ ૧॥

રાધાસુખસુધાસિન્ધુઃ કૃષ્ણશ્ચુમ્બતિ રાધિકામ્ ।
શ્યામપ્રેમમયી રાધા સદા ચુમ્બતિ માધવમ્ ॥ ૨॥

ત્રિભઙ્ગલલિતઃ કૃષ્ણો મુરલીં પૂરયેન્મુદા ।
ચાલયેદ્વેણુરન્ધ્રેષુ રાધિકા ચ કરાઙ્ગુલીઃ ॥ ૩॥

શ્રીનામાકર્ષણં કૃષ્ણં રાધા ગાયતિ સુન્દરમ્ ।
શબ્દબ્રહ્મધ્વનિં રાધાં કૃષ્ણો ધારયતિ ધ્રુવમ્ ॥ ૪॥

મુરલીકલસઙ્ગીતં શ્રુત્વા મુગ્ધા વ્રજસ્ત્રિયઃ ।
કદમ્બમૂલમાયાતા યત્રાસ્તિ મુરલીધરઃ ॥ ૫॥

રાધાકાન્તો વ્રજસ્ત્રીભિર્વેષ્ટિતો વ્રજમોહનઃ ।
શોભતે તારકામધ્યે તારકાનાયકો યથા ॥ ૬॥

કિશોરી સુન્દરી રાધા કિશોરઃ શ્યામસુન્દરઃ ।
કિશોર્યો વ્રજસુન્દર્યો વિહરન્તિ નિરન્તરમ્ ॥ ૭॥

નિત્યવૃન્દાવને રાધ્યા રાધાકૃષ્ણશ્ચ ગોપિકાઃ ।
મણ્ડલં પૂર્ણરાસસ્ય લીલયા સંવિતથ્યતે ॥ ૮॥

રાધયા સહ કૃષ્ણેન ક્રિયતે રાસમણ્ડલમ્ ।
કલ્પિતાનેકરૂપેણ માયયા પરમાત્મના ॥ ૯॥

માધવરાધયોર્મધ્યે રાધામાધવયોરપિ ।
માધવો રાધયા સાર્દ્ધં રાજતે રાસમણ્ડલે ॥ ૧૦॥

ગોપાલવલ્લભા ગોપ્યો રાધિકાયાઃ કલાત્મિકાઃ ।
ક્રીડન્તિ સહ કૃષ્ણેન રાસમણ્ડલમણ્ડિતાઃ ॥ ૧૧॥

કૃત્વા ચાનેકરૂપાણિ ગોપીમણ્ડલસંશ્રયઃ ।
ગોવિન્દો રમતે તત્ર તાસાં મધ્યે દ્વયોર્દ્વયોઃ ॥ ૧૨॥

પ્રેમસ્પર્શમણિં કૃષ્ણં શ્લિષ્યન્તો વ્રજયોષિતઃ ।
ભવન્તિ સર્વકાલાઢ્યા ગોવિન્દહૃદયઙ્ગમાઃ ॥ ૧૩॥

એકૈકગોપિકાપાર્શ્વે હરેરેકૈકવિગ્રહઃ ।
સુવર્ણગુટિકાયોગે મધ્યે મારકતો યથા ॥ ૧૪॥

હેમકલ્પલતાગોપીબાહુભિઃ કણ્ઠમાલયા ।
તમાલશ્યામલઃ કૃષ્ણો ઘૂર્ણ્યતે રાસલીલયા ॥ ૧૫॥

કિઙ્કિણીનૂપુરાદીનાં ભૂષણાનાં ચ ભૂષણમ્ ।
કૈશોરં સફલં કુર્વન્ ગોપીભિઃ સહ મોદતે ॥ ૧૬॥

રાધાકૃષ્ણેતિ સઙ્ગીતં ગોપ્યો ગાયન્તિ સુસ્વરમ્ ।
રાધાકૃષ્ણરીનાત્તહસ્તકાનુપદક્રમૈઃ ॥ ૧૭॥

જય કૃષ્ણ મનોહર યોગધરે યદુનન્દન નન્દકિશોર હરે ।
જય રાસરસેશ્વરિ પૂર્ણતમે વરદે વૃષભાનુકિશોરિ યમે ॥ ૧૮॥

જયતીહ કદમ્બતલે મિલિતઃ કલવેણુસમીરિતગાનરતઃ ।
સહ રાધિકયા હરિરેકમહઃ સતતં તરુણીગણમધ્યગતઃ ॥ ૧૯॥

વૃષભાનુસુતા પરમા પ્રકૃતિઃ પુરુષો વ્રજરાજસુતપ્રકૃતિઃ ।
મુહુર્નૃત્યતિ ગાયતિ વાદયતે સહ ગોપિકયા વિપિને રમતે ॥ ૨૦॥

યમુનાપુલિને વૃષભાનુસુતા નવકા-લલિતાદિ સખીસહિતા ।
રમતે વિધુના સહ નૃત્યવતા ગતિચઞ્ચલકુણ્ડલહારવતા ॥ ૨૧॥

સ્ફુટપદ્મમુખી વૃષભાનુસુતા નવનીતસુકોમલબાહુયુતા ।
પરિરભ્ય હરિં પ્રિયમાત્મસુખં પરિચુમ્બતિ શારદચન્દ્રમુખમ્ ॥ ૨૨॥

રસિકો વ્રજરાજસુતઃ સુરતે રસિકાં વૃષભાનુસુતાં ભજતે ।
નવપલ્લવકલ્પિતતલ્પગતાં સુકુમારમનોભવભાવવશામ્ ॥ ૨૩॥

વસુદેવસુતોરસિ હેમલતા સ્ફુટપીનપયોધરભારવતા ।
શયનં કુરુતે વૃષભાનુસુતા પ્રણમામિ સદા વૃષભાનુસુતામ્ ।
નવનીરદસુન્દરનીલતનું તડિદુજ્જ્વલકુણ્ડલિનીં સુતનુમ્ ॥ ૨૫॥

શિથિકણ્ઠશિખણ્ડલસન્મુકુટં કબરીપરિબદ્ધકિરીટઘટામ્(?) ।
કમલાશ્રિતખઞ્જનનેત્રયુગં મકરાકૃતિકુણ્ડલગણ્ડયુગમ્ ॥ ૨૬॥

પરિપૂર્ણમૃગાઙ્કસુચારુમુખં મણિકુણ્ડલમણ્ડિતગણ્ડયુગમ્ ।
કનકાઙ્ગદશોભિતબાહુધરં મણિકઙ્કણશોભિતશઙ્ખકરામ્ ॥ ૨૭॥

મણિકૌસ્તુભભૂષિતહારયુતં કુચકુમ્ભવિરાજિતહારલતામ્ ।
તુલસીદલદામસુગન્ધિતનું હરિચન્દનચર્ચિતગૌરતનુમ્ ॥ ૨૮॥

તનુભૂષિતપીતપટીજડિતં રશનાન્વિતનીલનિચોલયુતામ્ ।
તરસાઞ્જનદિગ્ગજરાજગતિં કલનૂપુરહંસવિલાસગતિમ્ ॥ ૨૯॥

રતિનાથમનોહરવેશધરં નિજનાથમનોહરવેશધરામ્ ।

મણિનિર્મિતપઙ્કજમધ્યગતં રસરાસમનોહરમધ્યરતામ્ ॥ ૩૦॥

મુરલીમધુરશ્રુતિરાગપરં સ્વરસપ્તસમન્વિતગાનપરામ્ ।
નવનાયકવેશકિશોરવયો વ્રજરાજસુતઃ સહ રાધિકયા ॥ ૩૧॥

ઇતરેતરબદ્ધકરભ્રમણં કુરુતે કુસુમાયુધકેલિવનમ્ ।
અધિકેહિતમાધવરાધિકયોઃ વૃતરાસપરસ્પરમણ્ડલયોઃ॥ ૩૨॥

મણિકઙ્કણશિઞ્ચિતતાલવનં હરતે સનકાદિમુનેર્મનનમ્ ।
વૃષભાનુસુતા વ્રજરાજસુતઃ કનકપ્રતિમા મણિમારકતઃ ॥ ૩૩॥

ભ્રમતીહ યથાવિથિ યન્ત્રગતઃ સહયોગગતો યમિતાન્તરિતઃ ।
ઉભયોરુભયોરાધયોર્દયિતે પૃથગન્તરિતે વૃષભાનુસુતે ॥ ૩૪॥

વૃષભાનુસુતાભુજબદ્ધગલઃ કુશલી વ્રજરાજસુતઃ સકલઃ ।
યદુનન્દનયોર્ભુજબદ્ધગલા વૃષભાનુસુતા રુચિરા સકલા ॥ ૩૫॥

વૃષભાનુસુતા વ્રજરાજસુતઃ વ્રજરાજસુતો વૃષભાનુસુતા ।
કેલિકદમ્બતલે વનમાલી નૃત્યતિ ચઞ્ચલચન્દ્રકમૌલી ॥ ૩૬॥

રાધિકયા સહ રાસવિલાસી ગોપવધૂપ્રિયગોકુલવાસી ।
ક્રીડતિ રાધિકયા સહ કૃષ્ણઃ શ્રીમુખચન્દ્રસુધારસતૃષ્ણઃ ॥ ૩૭॥

નર્તકખઞ્જનલોચનલોલઃ કુણ્ડલમણ્ડિતચારુકપોલઃ ।
કુઞ્જગૃહે કુસુમોત્તમતલ્પે સૂર્યસુતાજલવાયુસુકલ્પે ॥ ૩૮॥

કેશવ આદિરસં પ્રતિશેતે રાધિકયા સહ ચન્દ્રસુશીતે ।
રાસરસે સુવિરાજિતરાધા ચન્દનચર્ચિતપઙ્કજગન્ધા ॥ ૩૯॥

માધવસઙ્ગમવર્ધિતરઙ્ગા પૂર્ણમનોરથમન્મથસઙ્ગા ।
શોભનકોમલદિવ્યશરીરા કૃષ્ણવપુઃપરિમાણકિશોરા ॥ ૪૦॥

ભાવમયી વૃષભાનુકિશોરી કાઞ્ચનચમ્પકકુઙ્કુમગૌરી ।
રાધયોરાધયોર્મધ્યતો મધ્યતો માધવો માધવો મણ્ડલે શોભતે ॥ ૪૧॥

રાધિકા રાધિકા માધવં ચુમ્બતિ માધવો માધવો રાધિકાં શ્લિષ્યતિ ।
રાધિકા રાધિકા માધવં ગાયતિ માધતો રાધિકાં વેણુના ગાયતિ ॥ ૪૨॥

કલ્પિતે મણ્ડલે રાજતે રાધિકા માધવપ્રેમસન્દોહસંરાધિકા ।
રાધિકાં રાધિકાં ચાન્તરેણાન્તરઃ માધવં માધવં ચાન્તરેણાન્તરા ।
માધવો માધવો રાધિકા રાધિકા રાધિકા રાધિકા માધવો માધવઃ ॥ ૪૩॥

વાસાવતારવિસ્તારં વંશીવાદનસુન્દરમ્ ।
રતિકામમદાક્રાન્તં રાધાકૃષ્ણં ભજામ્યહમ્ ॥ ૪૪॥

ભ્રમન્તં રાસચક્રેણ નૃત્યન્તં તાલશિઞ્જિતૈઃ ।
ગોપીભિઃ સહ ગાયન્તં રાધાકૃષ્ણં ભજામ્યહમ્ ॥ ૪૫॥

રાસમણ્ડલમધ્યસ્થં પ્રફુલ્લવદનામ્બુજમ્ ।
અનન્યહૃદયાસક્તં રાધાકૃષ્ણં ભજામ્યહમ્ ॥ ૪૬॥

વિદ્યુદ્ગૌરં ઘનશ્યામં પ્રેમાલિઙ્ગનતત્પરમ્ ।
પરસ્પરકમર્દ્ધાઙ્ગં રાધાકૃષ્ણં ભજામ્યહમ્ ॥ ૪૭॥

રાધિકારૂપિણં કૃષ્ણં રાધિકાં કૃષ્ણરૂપિણીમ્ ।
રાસયોગાનુસારેણ રાધાકૃષ્ણં ભજામ્યહમ્ ॥ ૪૮॥

પુષ્પિતે માધવીકુઞ્જે પુષ્પતલ્પોપરિસ્થિતમ્ ।
વિપરીતરતાસક્તં રાધાકૃષ્ણં ભજામ્યહમ્ ॥ ૪૯॥

રાસક્રિડાપરિશ્રાન્તં મધુપાનપરાયણમ્ ।
તામ્બૂલપૂર્ણવક્ત્રેન્દું રાધાકૃષ્ણં ભજામ્યહમ્ ॥ ૫૦॥

રાસોલ્લાસકલાપૂર્ણં ગોપીમણ્ડલમણ્ડિતમ્ ।
શ્રીમાધવં રાધિકાખ્યં પૂર્ણચન્દ્રમુપાસ્મહે ॥ ૫૧॥

ચતુર્વર્ગફલં ત્યક્ત્વા શ્રીવૃન્દાવનમધ્યતઃ ।
શ્રીરાધા-શ્રીપાદપદ્મં પ્રાર્થયે જન્મજન્મનિ ॥ ૫૨॥

રાધાકૃષ્ણસુધાસિન્ધુરાસગઙ્ગાઙ્ગસઙ્ગમે ।
અવગાહ્ય મનોહંસો વિહરેચ્ચ યાથાસુખમ્ ॥ ૫૩॥

રાસગીતાં પઠેદ્યસ્તુ શૃણુયદ્વાપિ યો નરઃ ।
વાઞ્ચાસિદ્ધિર્ભવેત્તસ્ય ભક્તિઃ સ્યાત્ પ્રેમલક્ષણા ॥ ૫૪॥

લક્ષ્મીસ્તસ્ય વસેદ્ગેહે મુખે ભાતિ સરસ્વતી ।
ધર્માર્થકામકૈવલ્યં લભતે સત્યમેવ સઃ ॥ ૫૫॥

સમાપ્તેયં રાસગીતા ।

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

.. rAsagItA ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*